# नेपालसंस्कृतविश्वविद्यालयः
## चतुर्वर्षात्मकः शास्त्रिस्तरीयः पाठचक्रमः
## निर्माणवर्षः २०७७ तमो वैक्रमः

| | | | | | |
|---|---|---|---|---|---|
| पाठ्यांशनाम | : | साहित्यशास्त्रं काव्यञ्च | पाठ्यांशसङ्केत | : | सा..... |
| स्तरः | : | शास्त्री | खण्डः | : | द्वितीयः |
| विषयः | : | साहित्यम् | पत्रम् | : | तृतीयम् |
| पूर्णाङ्काः | : | १०० | उत्तीर्णताङ्काः | : | ३५ |
| साप्ताहिकपाठ्यभारः | : | ६ घण्टाः | वार्षिकपाठ्यभारः | : | १६० घण्टाः |

## १. पाठ्यांशपरिचयः

स्नातकस्तरस्य चतुर्वर्षात्मके पाठचक्रमे शास्त्रिद्वितीयवर्षस्य साहित्यविषयस्य तृतीयपत्रे निर्धारितस्य पाठ्यवस्तुनोंऽशद्वयं वर्तते– १) साहित्यशास्त्रम् २) काव्यञ्च । प्रथमे किल काव्यशास्त्ररूपेंऽशे हानप्रयोजनेन काव्यदोषाणामादानप्रयोजनेन च गुणानां रीतीनां शब्दार्थालङ्काराणाञ्च शिक्षणस्य व्यवस्था विद्यते । द्वितीये काव्यशिक्षणरूपेंऽशे खण्डकाव्यस्यैकस्य शिक्षणस्य व्यवस्था विहितास्ति । आद्यस्य साहित्यशास्त्रशिक्षणरूपस्यांशस्य कृते विश्वनाथकविराजकृतस्य साहित्यशास्त्रपरम्परायामत्यन्तं ख्यातस्य साहित्यदर्पणनामक- ग्रन्थस्य सप्तमपरिच्छेदादारभ्य दशमपरिच्छेदपर्यन्तं प्रतिपादितो विषयः पाठ्यवस्तुत्वेन निर्धारितोऽस्ति । द्वितीयस्य काव्याध्ययनरूपस्यांशस्य कृते च राष्ट्रप्रेमसंवलितं प्रकृतिचित्रणपरं सुललितं नैपालकेन कविना किञ्जल्कोपावेन गोपालवैद्येन प्रणीतं हिमाद्रिमहिमनामकं खण्डकाव्यं निर्धारितमस्ति ।

पाठ्यांशोऽयं साकल्येन चतुर्षु प्रकरणेषु विभक्तोऽस्ति । यत्र प्रथमेंऽशे त्रीणि प्रकरणानि सन्ति । द्वितीयेंऽशे चैकं प्रकरणं निर्दिष्टमस्ति । तत्राद्ये–

कप्रकरणे दोषसामान्यलक्षणस्य तद्भेदानां पदपदांशवाक्यार्थरसदोषाणां शिक्षणं निर्धारितमस्ति । द्वितीये खप्रकरणे गुणानां रीतीनाञ्चाभ्यासस्य तृतीये गप्रकरणे शब्दालङ्काराणामर्थालङ्काराणां च वक्ष्यमाणरीत्याः विवेचनस्य व्यवस्था विद्यते । चतुर्थे घप्रकरणे हिमाद्रिमहिमनामकस्य खण्डकाव्यस्य प्रणेतुः किञ्जल्कस्य देशकालकृत्यादिसंवलितस्य परिचयस्य, तत्रत्यस्य काव्यवस्तुनो विषयगतवैशिष्टयस्य तत्रत्यायाः काव्यकलायाश्च विश्लेषणेन सहैव हिमाद्रिमहिमखण्डकाव्यस्य पद्यानां काव्यसौष्ठवविश्लेषणपुरस्सरं व्याख्यानं शिक्षणाय निर्धारितमस्ति ।

## २.पाठ्यांशस्य सामान्यान्युद्देश्यानि

पाठ्यांशस्यास्याभ्यासेन छात्रैः सामान्यतयाधोनिर्दिष्टेषु विषयेषु दक्षता लप्स्यते –

१) काव्यगतानां दोषाणां ज्ञानेन दोषदृष्ट्या काव्यानां मूल्याङ्कने दोषपरिहारे च
२) गुणानां रीतीनाञ्चाभ्यासेन काव्यानां विश्लेषणे तेषां मूल्याङ्कने च
३) काव्यगतानामलङ्काराणां स्वरूपगतदक्षतया काव्यानां विश्लेषणे तन्मूल्याङ्कने च
४) साहित्यसर्गविधौ दोषाणां परिहारे गुणरीत्यलङ्काराणामाधाने च
५) किञ्जल्ककृतहिमाद्रिमहिमखण्डकाव्यस्याभ्यासेन काव्यसौन्दर्यस्य खण्डकाव्यसरण्याश्च विश्लेषणे ।

## ३..पाठ्यांशस्य विशिष्टान्युद्देश्यानि पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | विशिष्टान्युद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघटाः |
|---|---|---|---|---|
| कप्रकरणम् | दोषसामान्यलक्षणस्य तद्भेदानां पदपदांशवाक्यगतानां पदमात्रगतानां वाक्यमात्रगतानामर्थगतानां रसगतानाञ्च दोषाणां तेषां गुणत्वस्य परिहारोपायस्य च निरूपणम् । | पदपदांशवाक्यगताः पदमात्रगता वाक्यमात्रगता अर्थगता रसगताश्च दोषास्तेषां गुणत्वम्, रसविरोधपरिहारश्चैवं साहित्यदर्पणस्य सप्तमपरिच्छेदगतः सर्वोऽपि विषयः | ३० | ४८ |
| खप्रकरणम् | काव्यगतानां गुणानां रीतीनां तद्भेदानाञ्च लक्षलक्षणसमन्वयस्य तेषामन्तःसम्बन्धस्य च विवेचनम् | काव्यगता गुणाः, वामनादीनां प्राचीनानां मतसमीक्षणम्, रीतयः वक्त्राद्यौचित्याद् रचनादीनामन्यथात्वम्, साहित्यदर्पणस्याष्टमनवम-परिच्छेदयोः प्रतिपादिताः सर्वे विषयाः | १५ | २४ |
| गप्रकरणम् | काव्येऽङ्काराणां स्थितेः, गुणालङ्कारभेदस्य, शब्दालङ्काराणामर्थालङ्काराणां तद्भेदानाञ्च सलक्ष्यसङ्गति लक्षणनिरूपणम् यथासम्भवं तेषां साम्यवैषम्यविवेचनञ्च | अलङ्कारसामान्यलक्षण्म्, गुणालङ्काराणामन्तरम् शब्दार्थोभयवर्गत्वेनालङ्काराणां वर्गीकरणे बीजम्, शब्दालङ्कारास्तद्भेदाः, सर्वेऽर्थालङ्कारास्तद्भेदाश्च साहित्यदर्पणस्य दशमपरिच्छेदगतः सर्वोऽपि विषयः । | ४० | ६४ |

| | | | | |
|---|---|---|---|---|
| घप्रकरणकम् | किञ्जल्कनिष्ठस्य कवित्वस्य कृतित्वस्य व्यक्तित्वस्य च परिचयप्रदाने, हिमाद्रिमहिमकाव्यस्य साहित्यसौन्दर्यविश्लेषणे खण्डकाव्यसरण्या विवेचने च प्रावीण्यावगमः हिमाद्रिमहिमकाव्यस्य व्याख्याने दक्षतावगमश्च | हिमाद्रिमहिमकाव्यकर्तुः कवेः किञ्जल्कस्य परिचयः, हिमाद्रिमहिमकाव्यगतस्य सौन्दर्यस्य विवेचनम् खण्डकाव्यसरण्या निरूपणम् समङ्गलाचरणं हिमाद्रिखण्डकाव्यव्याख्यानम् | १५ | २४ |

## ४.पाठ्यवस्तुविवरणम्

**कप्रकरणे**

अ) दोषसामान्यलक्षणम्, दोषभेदाः, अधोनिर्दिष्टाः पदपदांशवाक्यगताः पदमात्रगता वाक्यमात्रगताश्च दोषाः -

पदपदांशवाक्यगताः -

दुःश्रवत्वम्
अश्लीलत्वम्
अनुचितार्थत्वम्,
अप्रयुक्तत्वम्,
ग्राम्यत्वम्
अप्रतीतत्वम्
सन्दिग्धत्वम्
नेयार्थत्वम्
निहतार्थत्वम्
अवाचकत्वम्
क्लिष्टत्वम्,
विरुद्धमतिकृत्त्वम्
अविमृष्टविधेयांशत्वम्

पदमात्रगताः –

असमर्थत्वम्
निरर्थकत्वम्
च्युतसंस्कारत्वम्

वाक्यमात्रगताः –

वर्णप्रतिकूलत्वम्
लुप्तविसर्गत्वम्
आहतविसर्गत्वम्
अधिकपदत्वम्
न्यूनपदत्वम्
कथितपदत्वम्
हतवृत्तत्वम्
पतत्प्रकर्षत्वम्
सन्धिविश्लेषत्वम्
सन्ध्यश्लीलत्वम्
सन्धिकष्टत्वम्
अर्धान्तरैकपदत्वम्
समाप्तपुनरात्तत्वम्
अभवन्मतसम्बन्धत्वम्
अक्रमत्वम्
अमतपरार्थत्वम्
वाच्यानभिधानत्वम्
भग्नप्रक्रमत्वम्

प्रसिद्धित्यागत्वम् अस्थानस्थपदत्वम् अस्थानसमासत्वम्
सङ्कीर्णत्वम् गर्भितत्वम् ।

आ) अधोनिर्दिष्टा अर्थगता दोषाः –

अपुष्टत्वम् दुष्क्रमत्वम् ग्राम्यत्वम्
व्याहतत्वम् अश्लीलत्वम् कष्टार्थत्वम्
अनवीकृतत्वम् निर्हेतुत्वम् प्रकाशितविरुद्धत्वम्
सन्दिग्धत्वम् पुनरुक्तत्वम् ख्यातिविद्धता
विद्याविरुद्धता साकाङ्क्षत्वम् सहचरभिन्नता
अस्थानयुक्तता अविशेषविशेषत्वम् विशेषाविशेषत्वम्
अनियमे नियमत्वम् नियमेऽनियमत्वम् विध्ययुक्तता
अनुवादायुक्तत्वम् निर्मुक्तपुनरुक्तत्वम् ।

इ) अधोनिर्दिष्टा रसदोषाः–

रसादीनां स्वशब्दाभिधानता स्थायिनां स्वशब्दवाच्यता व्यभिचारिणां स्वशब्दाभिधानता
विरोधिरसविभावादिपरिग्रहः अनुभावविभावयोः कष्टाक्षेपः रसस्याकाण्डे प्रथनम्
रसस्याकाण्डे विच्छेदः रसस्य पुनःपुनर्दीप्तिः अङ्गिनोऽननुसन्धानम्
अनङ्गरसकीर्तनम् अङ्गस्यातिविस्तारः प्रकृतिविपर्ययः ।
अर्थानौचित्यम् इत्येतेषां दोषाणां सोदाहरणसङ्गति स्वरूपनिरूपणं यथासम्भवं परस्परभेद-निरूपणञ्च ।

ई) अलङ्कारदोषाणामनुचितार्थादिष्वन्तर्भावः, दोषाणां नित्यानित्यव्यवस्था, दुःश्रवत्वादीनां दोषाणां गुणत्वनिरूपणं रसदोषपरिहारोपायाश्च ।

**खप्रकरणे**

अ) गुणसामान्यलक्षणम्, गुणभेदनिरूपणम्, गुणव्यञ्जकवर्णवृत्तिरचनानां निरूपणम्, रसेषु गुणानां सातिशयतायाः स्थितिः, प्राचीनोक्तानां शब्दार्थगुणानामन्तर्भावो निरसनञ्च ।

आ) रीतिलक्षणम्, गुणरीत्योरन्तःसम्बन्धस्य साधर्म्यवैधर्म्ययोश्च विवेचनम्, सोदाहरणं रीतिभेदस्वरूपनिरूपणम्, वक्त्राद्यौचित्याद् रचनादीनामन्यथात्वम् ।

**गप्रकरणे**

अ) अलङ्कारसामान्यलक्षणम्, गुणालङ्कारयोरन्तरम्, अलङ्काराणां शब्दार्थधर्मत्वम्, शब्दगतत्वेनार्थगतत्वेन शब्दार्थोभयगतत्वेन चालङ्काराणां विभागे बीजम् ।

आ) अधोनिर्दिष्टानां शब्दालङ्काराणामुभयालङ्कारस्य च लक्ष्यलक्षणसङ्गतिः, तेषां यथासम्भवं मिथः साम्यवैषम्यनिरूपणञ्च–

पुनरुक्तवदाभासः, अनुप्रासस्तद्भेदाश्च, यमकम्, वक्रोक्तिः, भाषासमः, शब्दश्लेषस्तद्भेदाश्च, चित्रालङ्कारः, प्रहेलिकाया अलङ्कारत्वनिरसनम् ।

इ) अधोनिर्दिष्टानामर्थालङ्काराणां सलक्ष्यलक्षणसङ्गति (सत्सु भेदेषु सभेदानां) निरूपणम्, तेषां यथासम्भवं मिथः साम्यवैषम्यविश्लेषणञ्च–

| | | |
|---|---|---|
| उपमा, | अनन्वयः, | उपमेयोपमा, |
| स्मरणम्, | रूपकम्, | परिणामः, |
| सन्देहः, | भ्रान्तिमान्, | उल्लेखः, |
| अपह्नुतिः, | निश्चयः, | उत्प्रेक्षा, |
| अतिशयोक्तिः, | तुल्ययोगिता, | दीपकम्, |
| प्रतिवस्तूपमा, | दृष्टान्तः, | निदर्शना, |
| व्यतिरेकः, | सहोक्तिः, | विनोक्तिः, |
| समासोक्तिः, | परिकरः, | अर्थश्लेषः, |
| अप्रस्तुतप्रशंसा, | व्याजस्तुतिः, | पर्यायोक्तम्, |
| अर्थान्तरन्यासः, | काव्यलिङ्गम् | अनुमानम्, |
| हेतुः, | अनुकूलम्, | आक्षेपः, |
| विभावना, | विशेषोक्तिः, | विरोधः, |
| असङ्गतिः, | विषमम्, | समम्, |
| विचित्रम्, | अधिकम्, | अन्योन्यम्, |
| विशेषः, | व्याघातः, | कारणमाला, |
| मालादीपकम्, | एकावली | सारः |
| यथासङ्ख्यम्, | पर्यायः, | परिवृत्तिः, |
| परिसङ्ख्या, | उत्तरम्, | अर्थापत्तिः, |
| विकल्पः, | समुच्चयः, | समाधिः, |
| प्रत्यनीकम्, | प्रतीपम्, | मीलितम्, |
| सामान्यम्, | तद्गुणः, | अतद्गुणः, |
| सूक्ष्मम्, | व्याजोक्तिः, | स्वभावोक्तिः, |
| भाविकम्, | उदात्तम्, | रसवदादयः, |
| संसृष्टिः | सङ्करः । | |

**घप्रकरणे**

अ) किञ्जल्ककवेर्देशकालवंशपरम्परादिसंवलितो वैयक्तिकः कृतित्वकवित्वविद्वत्त्वसंवलितश्च साहित्यिकः परिचयः ।

आ) हिमाद्रिमहिमखण्डकाव्यस्य वर्ण्यवस्तुगतं काव्यसौन्दर्यगतञ्च विश्लेषणम् ।

इ) हिमाद्रिमहिमखण्डकाव्यस्य काव्यशास्त्रीयतत्त्वदृष्ट्या विवेचनम् ।

ई) हिमाद्रिमहिमखण्डकाव्यस्य मङ्गलपद्यानां काव्यगतवैशिष्ट्यनिरूपणपुरस्सरं व्याख्यानम् ।

उ) हिमाद्रिमहिमखण्डकाव्यगतानां पद्यानां काव्यशास्त्रीयवैशिष्ट्यविश्लेषणपुरस्सरं व्याख्यानम् ।

## ५.शिक्षणविधयः शिक्षणसामग्री च

काव्यशास्त्रशिक्षणाय आगमन-निगमन-तुलना-प्रयोग-शास्त्रार्थविधयो मुख्यतयोपयोगिनो भवन्ति । प्रश्नोत्तरविधिस्तु सर्वैर्विधिभिः संयोज्य सर्वविधेषु शिक्षणेषु प्रयोक्तव्यः, येन छात्राणां जागरूकतायां रुच्युत्पादने जिज्ञासाभिवृद्धौ सक्रियतायाञ्च योगो भवति । काव्याध्ययने च व्याख्या-प्रवचन-विश्लेषण-विमर्श-तुलना-प्रश्नोत्तरादयो विधयो यथावश्यकमुपयोज्याः ।

तालिकाश्चित्राणि श्वेतश्यामपट्टिकादयः स्थलादिनिरीक्षणादयः सङ्गणकयन्त्रादियोजनया वैद्युतोपकरणकिरण- जवनिकापट्टिकाप्रक्षेपणप्रसारण(स्लाइडप्रोजेक्टर) प्रभृतयः पारम्परीणा आधुनिकाश्च दृश्यश्रव्यसामग्र्यो यथावश्यकं यथोपलब्धि यथावसरञ्चोपयोज्याः ।

## ६. मूल्याङ्कनविधिः

द्विविधो हि मूल्याङ्कनविधिराभ्यन्तरो बाह्यश्च । तत्राभ्यान्तरं मूल्याङ्कनं छात्रस्य कक्षायामुपस्थितिमनुशासनं कक्षाकार्यं गृहकार्यमध्ययनप्रवृत्तिं परियोजनासम्पादनं विद्यापीठेन सञ्चालितेष्वतिरिक्तबौद्धिक-क्रीडनादिषु कार्यकलापेषु संलग्नतामान्तरिकीं परीक्षां प्रतिभानञ्चाधिकृत्य सम्बद्धविषयशिक्षकेण परीक्षानियन्त्रणकार्यालयनिर्धारिते समये मूल्याङ्कनपत्रं प्रपूर्येत । आभ्यन्तरमूल्याङ्कनार्थं प्रतिशतं विंशतिपूर्णाङ्का निर्धारिताः । सम्बद्धशिक्षकेण विहितं मूल्याङ्कनं विद्यापीठप्रशासनेनातीवगोपनीतया परीक्षानियन्त्रणकार्यालयं प्रति यथासमयं प्रेष्येत ।

बाह्यं मूल्याङ्कनं परीक्षानियन्त्रणकार्यालयस्य व्यवस्थानुसारेण शैक्षिकवर्षसमाप्तौ लिखितपरीक्षया विधीयते । स्वतन्त्रछात्राणां नियमितच्छात्राणां च कृते प्रश्नपत्राणां मूल्याङ्कनस्य चैकरूपतायै पूर्णाङ्कानां शताङ्कात्मकतैव निर्धारितास्ति

नियमितच्छात्राणामुभयविधेष्वङ्केष्वधिगतेषु परीक्षानियन्त्रणकार्यालयेनानुपातिकसरण्याङ्कसंयोजनं विधीयेत ।

वार्षिक्यां परीक्षायां बाह्यं मूल्याङ्कनं विधातुमधोनिर्दिष्टरीत्या प्रश्नप्रकाराणां प्रष्टव्यानां समाधेयानाञ्च तेषां सङ्ख्याया अङ्कानाञ्च व्यवस्थापनेन प्रश्नपत्रनिर्माणं विधीयेत येन मूल्याङ्कनसरण्यामप्येकरूपतामानेतुं शक्येत ।

### वार्षिक-परीक्षा-प्रश्नपत्रनिर्माण-सारिणी

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसङ्ख्या | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क-गप्रकरणाभ्याम् | विवेचनात्मकाः | ३ | २ | १२ x२=२४ |
| क- ख- ग- घप्रकरणेभ्यः | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ x ६=४२ |
| क-ग-घप्रकरणेभ्यः | व्याख्यात्मकाः | ४ | ३ | ८ x ३=२४ |
| क-ख-गप्रकरणेभ्यः | वस्तुगताः | १० | १० | १x१०= १० |
| | | २६ | २१ | १०० |

**७. पाठ्यग्रन्थसूची**

(क) **पाठ्यग्रन्थौ**

१. कविराजविश्वनाथप्रणीतः *साहित्यदर्पणः* (७-१० परिच्छेदाः)

२. कविकिञ्जल्ककृतं ***हिमाद्रिमहिम*खण्डकाव्यम्** (सम्पूर्णम्)

(ख) **सहायकग्रन्थाः**

१ .कविराजविश्वनाथरचितः *साहित्यदर्पणः* शेषराजशर्मप्रणीतया ***चन्द्रकला*टी**कया सहितः ।

२ कविराजविश्वनाथरचितः *साहित्यदर्पणः* हरिदासप्रणीतया ***कुसुमप्रतिमा*टी**कया सहितः ।

३.कविराजविश्वनाथरचितः *साहित्यदर्पणः* कृष्णमोहनशास्त्रिप्रणीतया ***लक्ष्मी*टी**कया सहितः ।

३ कविराजविश्वनाथरचितः *साहित्यदर्पणः* शालग्रामशर्मप्रणीतया ***विमला*टी**कयासहितः ।

४ कविराजविश्वनाथरचितः *साहित्यदर्पणः* योगेश्वरदत्तशर्मसम्पादिताभिरष्टभिष्टीकाभिः सहितः ।
५ किञ्जल्कः, वि.सं. २०६१, *हिमाद्रिमहिमा* पोखरा : अनिलवैद्यः भैषज्यसदनम् ।
५. राजवंश सहाय हीरा, सन् १९७०, *अलङ्कारानुशीलन* वाराणसी : चौखम्बासंस्कृत सीरीज आफिस ।
६ . राजवंश सहाय हीरा, सन् १९७०, *अलङ्कारमीमांसा* वाराणसी : चौखम्बाविद्याभवन ।

**(ग) सन्दर्भग्रन्थाः**

१. जगदीशचन्द्रमिश्रः १९८६ ई, *अलङ्कारशास्त्रस्येतिहासः*, वाराणसी : चौखम्बा सुरभारती प्रकाशन ।
२ जयमन्तमिश्रः, १९६४ ई., *काव्यात्ममीमांसा* वाराणसी : चौखम्बा सुरभारती प्रकाशन ।
३. बलदेव उपाध्याय आदि (सं), २००९ई, संस्कृत वाङ्मय का बृहद् इतिहास (अष्टम काव्यशास्त्रखण्ड) लखनऊ : उत्तरप्रदेश संस्कृत संस्थान ।

००० 